A.C. Joshi Library
P.U. Chandigarh

MSS No. 343 K Subject Religion

Name of MSS श्रीमद्भागवत सटीक

Author शंकराचार्य

Period Folios 71

Script Devnagiri Source Prithipal Singh

Missing Folios 70 A

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

(12)

द्वादशारंभः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

A. no. 343

1

श्री भाग° टी° १

ॐ श्रीगणेशाय नमः ॐ नत्वं निश्रीपरानंदरूपी मंगलमहेशः यानित्वमनुवंशेनैमेषंप्रशोविगतारशः
उक्तानुयोटशाख्यायेहीटपीताश्रयः मनःस्थितानावपिताभ्यामाश्रयः चेश्वरःसततः २ उक्तोलया
वपिवेनग्रहकृतानंतिकेलये स्थितानतयावामोमहापुरुषवर्णने ३ तत्रादौषड्भिरध्यायैःश्रु
कःमादवरीहितंशेषेत्तत्रैविलान्याहहतःष्टाध्यमविभिः ४ स्वाश्रयश्रवणकार्यानविलंबो
मनोषिताः इत्येषकालवैषमंवृतभिस्तावउच्यते ५ ततःतमष्टमेभाविमागधान्वयभूमिपान् का
लिपभाक्तः पादस्कारिमलीमसात् ६ एवंभूतेसोमवंशेश्रीमुकुंदस्येरकीडावर्णिताम्यामे
नपवंशोभावीवर्ण्यते श्रीकृष्णभक्तिमुक्तामुक्तैर्वर्णनात्लोनिवर्ण्यते तदेवंवैवस्वतमनुवंशेसो

ॐ श्रीराजोवाच स्वधामनुगतेकृष्णेयदुवंशविभूषणे कस्यवंशोभवत्पृथ्व्यामेतराचक्ष्व
मेमुने १

लीमर

मवंशप्रस्तावेनश्रीकृष्णावतारचरितानिप्रपंचमनुवर्णितानिनानिस्त्रयेदातीभाविसोमवंशाःकलो
मवंशप्रस्तावेनश्रीकृष्णस्यावतारचरितानि श्रीकृष्णभक्तिनिर्गमतायानुवर्ण्यतेतत्रतसोमवंशशा
विजानीयसंस्कारिमसोवेणगंधाराश्रीकृष्णभक्ति वंशानुवर्ण्यते तत्रहशोर्वंशउपरिचरोवसुः तस्यहहद्रथः क्रतेन्द्रका
लास्यविदेरकालानुवर्तितयामागधवंशानुवर्ण्यते तत्रैवसहदेवात्मार्जारिः ततश्रुतश्रवा
तस्यजरासंधः तस्यसहदेवः पुरोभूरिसुकंनवमस्कंधे प्रपंचयतियोमस्रति
पुंजयांतावंशानिभाविनोराजानोनिरूपिताः तदुपरितनेवंशसकलाविरोषैः
रिपुंजयएववपुरंजयःस्वामिनंपुरंजयंहत्वास्वपुत्रंप्रद्योतंनंराजानंकरिष्यति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1A

तत्रस्वरूपलक्षणं सत्यमिति सत्यत्वे हेतुः यत्र यस्मिन् त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूतेंद्रि-
यदेवतारूपः अमृषा सत्यः यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते तं परं सत्यमित्यर्थः अत्र दृष्टांतः ते-
जोवारिमृदां यथा विनिमयो यत्र यो यस्मिन्नन्यावभासः स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः
तत्र तेजसि वारिबुद्धिः मरीचितोये प्रसिद्धा मृदि काचादौ वारिबुद्धिः वारिणि च काचादिबुद्धिरित्यादि
यथायथमस्तु यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं तत्र सृष्टेर्वायं त्रिस-
र्गो न वस्तुतः सन्निति यद्वेति अनेन प्रतीतमुपाधिसंबंधं वारयति स्वेनैव धाम्ना महसा निरस्तकुहकं कर्क-
परं यस्मिन्नतं तटस्थलक्षणमाह जन्माद्यीति अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति तं धीमहीति

ॐ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति य-
त्सूरयः तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं
परं धीमहि । ॥ श्रीराम ॥

तत्र हेतुः अन्वयादितरतः कार्येषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् अकार्येभ्यः खपुष्पादिभ्यश्च
तद्व्यतिरेकात् यद्वा अन्वयशब्देनानुवृत्तिः इतरशब्देन व्यावृत्तिः अनुवृत्तत्वात् सद्रूपं ब्रह्म कारणं मृत्सु-
वर्णादिवत् व्यावृत्तत्वात् विश्वं कार्यं घटकुंडलादिवदित्यर्थः यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां
घटस्य मृत्स्नादि तद्यतो भवतीति संबंधः तथा च श्रुतिः यतो वा इमानि भूतानि जायंते येन जातानि जी-
वंति यत्प्रयंत्यभिसंविशंतीत्याद्या स्मृतिश्च यतः सर्वाणि भूतानि भवंत्यादियुगागमे यस्मिंश्च
प्रलयं यांति पुनरेव युगक्षये इत्याद्या तर्हि किं प्रधानं जगत्कारणत्वेनाध्येयमभिप्रेतं नेत्याह अ-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी° २

2

भित्तेयः तं सम्पेदत्तत्रैलोक्यानस्तु नाउत्तिस इमांलोकानसृजतेति श्रुतेः ईक्षितेर्नाशब्दमिति न्यायाच्च तर्हि
ज्ञः स्यान्नेत्याह स्वराट् स्वेनैव राजते यः तं स्वतःसिद्धज्ञानमित्यर्थः तर्हि किं ब्रह्मा हिरण्यगर्भः समवर्त
ताग्रे भूतस्य जातः पतिरेक आसीदित्येवं नेत्याह तेने इत्यादि आदिकवये ब्रह्मणेऽपि ब्रह्म वेदं यस्तेने प्रकाशितवान्
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणम
हं प्रपद्ये इति श्रुतेः ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धं सत्यं तत्तु हृदा मनसैव तेने अनेन बुद्धिप्र
वृत्तिप्रवर्तकत्वेन गायत्र्यर्थो दर्शितः वर्तते हि प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं
स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामधिपः प्रसीदतां ननु च ब्रह्मणः स्वयमे
व सम्यक्प्रतिबुद्धस्यापि येन वेदमुपलभतां नेत्याह यत् यस्मिन् ब्रह्मणि सूरयोऽपि मुह्यन्तीति तस्माद्ब्रह्म
णोऽपि पराधीनज्ञानत्वात् स्वतःसिद्धज्ञानः परमेश्वर एव जगत्कारणं अत एव सत्यः अतः सर्वोप्र
दर्शात्तु परमार्थसत्यः सर्वज्ञत्वेन वा निरस्तकुहकः तं धीमहीति गायत्र्या आरम्भेण च गायत्र्याख्यब्र
ह्मविद्यारूपमेतत्पुराणमिति दर्शितं यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे यत्राधिकृत्य गायं
त्रीं वर्ण्यते धर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतमिष्यते लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितं
प्रोष्ठपद्यां पौर्णमास्यां स याति परमं पदं अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितं पुराणान्तरे च ग्रन्थोऽष्टा
दशसाहस्रो द्वादशस्कन्धसम्मितः हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा गायत्र्या च समारंभः तद्वै भागवतं वि
दुः पद्मपुराणे अम्बरीषं प्रति गौतमवचनं अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु पठस्व स्वमुखेनापि यदीच्छ
सि भवक्षयं अत एव भागवतं नामान्यदित्यपि न शंकनीयं। इदानीं ग्रन्थप्रवर्तनाय श्रीभागवतस्य कर्त्तुरवप

विषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति धर्म ॥

2A

अत्र श्रीमति सुंदरे श्रीभागवते परमो धर्मो निरूप्यते परमत्वे हेतुः प्रकर्षेणोज्झितं कैतवं फलाभिसंधिल
क्षणं कपटं यस्मिन्सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इ
ति अधिकारितोपि धर्मस्य परमत्वमाह निर्मत्सराणां परोत्कर्षासहनं मत्सरः तद्रहितानां सतां भूतानुकं
पिनामेवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ज्ञानकांडविषयेभ्योपि श्रैष्ठ्यमाह वेद्यमिति वा
स्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं यद्वा वास्तवशब्देन वस्तुनों
शो जीवः वस्तुनः शक्तिर्माया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं अयत्नेनैव
ज्ञातुं शक्यं ततः किमत आह शिवदं परमसुखदं किं च आध्यात्मिकादितापत्रयोन्मूलनं च अनेन ज्ञान

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्ष
णात् २ ॥ रम्

कांडविषयेभ्यः श्रैष्ठ्यं दर्शितं कर्तृतोपि श्रैष्ठ्यमाह महामुनिः श्रीनारायणः तेन
प्रथमं संक्षेपतः कृते देवताकांडगतं श्रैष्ठ्यमाह परैः शास्त्रैस्तदुक्तैः साधनैर्वा ईश्वरो हृदि किं सद्य एव
रुध्यते स्थिरीक्रियते वा शब्दः कटाक्षे किंतु विलंबेन कथंचिदेव अत्र तु शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्ष
णादेवावरुध्यते इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह कृतिभिरिति श्रवणेच्छा तु पुण्यैर्विना
नोत्पद्यते इत्यर्थः तस्मात्त्रिकांडयथार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं
अतो नित्यमेतदेव श्रोतव्यमिति भावः २ इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं वि
धीयते अपि तु सर्वशास्त्रफलरूपमिदमतः परमादरेण सेव्यमित्याह निगमेति निगमो वेदः स एव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

3

श्री
भा॰प्र
टी॰
३

कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिति भागवतं नाम तत्तु वैकुंठगतं नारदेनानीय मह्यं
व्यासाय दत्तं मया च शुकस्य मुखे निहितं तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंप
रया शनैरखंडमेवावतीर्णं न तूच्चनिपातनात्स्फुटितमित्यर्थः एतच्च भविष्यदपि भूतवन्निर्दिष्टं मना
गताख्यानेनैवास्य शास्त्रस्य प्रवृत्तिः अत एवामृतरूपेण द्रवेण संहितं लोके हि शुकमुखस्पृष्टं फल
ममृतमिव स्वादु भवतीति प्रसिद्धं अत्र शुको मुनिः अमृतं परमानंदः स एव द्रवो रसः रसो वै सः रसं
ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः अतः हे रसिकाः रसज्ञाः तत्रापि भावुकाः हे रसविशेषभावनाच
तुराः अहो भुवि गलितमिति सुलभमित्यलाभोक्तिः इदं भागवतं नाम फलं मुहुः पिबत ननु त्वगस्थ्या।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भा
गवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३

दिकं विहाय फलाद्रसः पीयते कथं फलमेव पातव्यं तत्राह रसं रसरूपं अतः त्वगस्थ्यादेर्हेयस्याभावा
त्फलमेव कृत्स्नं पिबत अत्र च रसतादात्म्यविवक्षया रसमव्यस्याविवक्षितत्वाद्गुणत्वव्यवनेपि रसत्वा
द्वेन संलूपः शन्याभावात् तेन विनैव रसफलमिति सामानाधिकरण्येन च फलमित्युक्ते पाना संभ
वो हेयांशासक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं रसमित्युक्ते पि गलितस्य रसस्य पाने मध्यामा
नत्वं फलमित्युक्तं इदं च भागवतं रसमास्तनपाने मोदोपित्या न्याय्यमित्याह आलयं लयो मोक्षः अ
भिविधावाकारः लयमभिव्याप्य न हीदं स्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतु सेव्यत एव वक्ष्यति हि ३
आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति ३ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

3A

वेदेवमनेन श्लोकत्रयेणाभिधायेष्टदेवतानमस्कारपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिसंबंधा
धिकारिणां वैशिष्ट्येनास्य सर्वोत्कर्षमुक्तं तेन च श्रोतॄनभिमुखीकृत्य शास्त्रमारभते नैमिषे इति श्रीब्रह्मणो वि
सृष्टस्य चक्रस्य नेमिः शीर्यते कुंठी भवति यत्र तन्नैमिषं नैमिषमेव नैमिषं तथा च वायवीये एतन्मनो
मयं चक्रं मया सृष्टं विसृज्यते यत्रास्य शीर्यते नेमिः स देशः तपसः शुभः इत्युक्त्वा सूर्यसंकाशं चक्रं सृ
ष्ट्वा मनोमयं प्रणिपत्य महादेवं विससर्ज पितामहः तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं प्रययु
स्तस्य चक्रस्य यत्र नेमिर्विशीर्यते तद्वनं तेन विख्यातं नैमिषं मुनिपूजितं इति नैमिशे इति पाठे वराह
पुराणोक्तं द्रष्टव्यं तथा हि गौरमुखं प्रति श्रीभगवद्वाक्यं एवं कृतवान् ततो देवो मुनिं गौरमुखं ततः

नैमिषेनिमिषक्षेत्रे ऋषयः शौनकादयः सत्रं स्वर्गाय लोकाय सहस्रसममासत ४ त ए
कदा तु मुनयः प्रातर्हुतहुताग्नयः सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात ५ ॥

उवाच निमिषेणेदं निहतं दानवं बलं अरण्येस्मिंस्ततस्त्वेवं नैमिषारण्यसंज्ञितं भविष्यति यथार्थं
वै ब्राह्मणानां विशेषकं अनिमिषः श्रीविष्णुरलमदृष्टित्वात तस्य देशे तथा चायं वा शौनकादिव
वंने देशे स्मिन्वैष्णवे वयमिति स्वर्गीयत इति स्वर्गो यो हरिः स एव लोकः भक्तानां निवासस्थाने
तस्मै तत्प्राप्तये इत्यर्थः सहस्रसमाः संवत्सरश्रुतुकालो यस्य तत्सत्रं तत्कर्म दीक्षिताः आसत उप
विविशुः यद्वा आसत आकुर्वन्नित्यर्थः आलभन्त निर्वर्तितवन्त इत्यादिवत्सत्ययोद्धारणमाचार्यैर्ने
नासनधात्वर्थस्याविवक्षितत्वात् ४ प्रातःकाले हुताः एव हुता अग्नयो यैस्ते अनेन नित्यनैमित्तिकहो ॥ ॥ ॥
मसाकल्यं दर्शितं इदं वक्ष्यमाणं आदरात्पप्रच्छुः ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा प्र टी ४

विविदिषितानर्थान्पृच्छन्तस्तस्य सर्वविषयज्ञानातिशयमाहुः त्वयेति त्रिभिः श्लोकैः इतिहासो महाभारतादिः
तत्सहितानि न केवलमधीतानि अपि त्वाख्यातान्यपि आख्यातानि च उत अपि यानि धर्मशास्त्राणि
तान्यपि ६ किंच यानीत्यादि विदां विदुषां मध्ये श्रेष्ठः व्यासः यानि वेद परावरं सगुणनिर्गुणब्रह्म तद्वि
विदंतीति तथा ७ वेत्थ ज्ञातवानसि सौम्य हे साधो तेषामनुग्रहात् तत्त्वतो ज्ञाने हेतुमाह ब्रूयुरिति स्निग्ध
स्य प्रेमवतः उत अपि गुह्यं रहस्यमपि गुरवो ब्रूयुरेव ८ अंजसा अग्र्यार्जवेन प्रकारेण एकान्ततः श्रेयः अव्यभिचारि श्रेयः

ऋषय ऊचुः त्वया खलु पुराणानि सेतिहासानि चानघ आख्यातान्यप्यधीतानि धर्मशास्त्रा
णि यान्युत ६ यानि वेद विदां श्रेष्ठो भगवान्बादरायणः अन्ये च मुनयः सूत परावरविदो विदुः
वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ८ तत्र
तत्राञ्जसायुष्मन्भवता यद्विनिश्चितं पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ९ प्रायेणा
ल्पायुषः सभ्य कलावस्मिन्युगे जनाः मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः १० भूरीणि
भूरिकर्माणि श्रोतव्यानि विभागशः अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ॥ ब्रूहि नः श्र
द्दधानानां येनात्मा संप्रसीदति सूत जानासि भद्रं ते भगवान्सात्वतां पतिः १२

साधनं ९ अन्येन त्वधुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चयं कर्तुं न संभवतीत्याहुः प्रायेणेति १० स
भ्य साधो अस्मिन्युगे कलौ अल्पायुषो जनाः तत्रापि मन्दाः अलसाः तत्रापि सुमन्दमतयः तत्रापि मंद
भाग्या विघ्नाकुलाः तत्रापि उपद्रुता रोगादिभिः १० न च बहुशास्त्रश्रवणेनापि तावत्फलसिद्धिरित्या
हुः भूरीणि कर्माणि येषु यानि येषु तानि समुद्धृत्य यथावदुद्धृत्य येन येनोद्धृतवचनेन आत्मा बुद्धिः संप्र

४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

4A

अभ्रांतं सूत जानासि इति पंचभिः भद्रं ते इत्यौत्सुक्येनाशीर्वादः भगवान्निरतिशयैश्वर्यादिगुणः सात्व
तां सत्कुलेन सम्यक् मूर्तिर्भगवान् उपास्यते यया विद्यत एषामिति सात्वता भक्ताः स्वार्थे अण् सात्वतां वा
यस्मादिवत. तस्य वा अवतारमाधोतद्देवं सात्वता इति भवति तेषां पतिः पालकः यस्यार्थे विशेषस्य विकी
र्षया वसुदेवस्य भार्यायां देवक्यां जातः अगादेहसूतत्वाँ वर्णयितुं अर्हसि सामान्यास्त्राव यस्याव
तारो भूतानां क्षेमाय पालनाय भवाय समृद्धये ।१२।१३ तत्प्रभावमनुवर्णयंतं तद्यशः श्रवणे च
नारो भूतानां क्षेमाय पालनाय भवाय समृद्धये आपन्न इति त्रिभिः संसृतिमापन्नः प्राप्तः विवशोपि ततः संसृतेः अयहेतः यद्यतो ना
मस्मात् बिभेति आपन्नः इति त्रिभिः संसृतिमापन्नः प्राप्तः विवशोपि ततः संसृतेः
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ।१३ यस्याव
तारो भूतानां क्षेमाय च भवाय च ।१३ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ततः सद्यो
विमुच्येत यद्बिभेति स्वयं भयं ।१४ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः सद्यः पुनंत्युप
स्पृष्टाः स्वर्धुन्यापोनुसेवया ।१५ कोवा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः शुद्धिकामो न शृ
णुयाद्यशः कलिमलापहं ।१६ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ब्रूहि नः श्रद्दधाना
नां लीलया दधतः कलाः ।१७ अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः लीला विदधतः स्वैरमी
यः भयमपि स्वयं बिभेति ।१४ किंच यत्पादः संश्रयो येषां मननपरा प्रशमः अयनं वर्त्म आश्रयो वा येषां
ते मुनयः उपस्पृष्टाः सन्निधिमात्रेणाभिसेविताः सद्यः पुनंति स्वर्धुनी गंगा तस्या आपः यत्पादाद्निःसृताः
नत्वत्रैव वर्तिष्यंते अतस्तत्संबंधेन पुनंत्यापि अनुसेवया पावनेति न सद्य इति मुनीनां मुक्तोक्तिः ।१५
तत्पुण्यश्लोकैरीड्यानि स्तव्यानि कर्माणि यस्य तस्य यशः ।१६ अथेति च आनंतरे अवतारकथाः स्थित्यर्थं स
वन्नत्र स्वैरं यथेच्छया पालयवतारः तदा आश्रयाः कथाः स्वैरं लीलां कुर्वतः श्रीकृष्णावतारप्रयोजनेनैव न चरितय

ईश्वरस्यात्ममायया ।१८

शोपितात्मयं ।१८।४ अभ्रांतं तत्सयितिऽदाराणि महं तिविध एवमादीनि सूरिभिः नारादिभिः
कलावतारहारिदर्शी ।१।१८

श्री भाग प्र टीं ५

5

एवमेतत्कथनेन पुनरपि तत्तृप्तिरस्त्येव श्रोतुमिच्छंनः न चात्मनः तत्र तथाभावमावेदयंति वयंतिति योगमाया
दिभुत्वमाशमाः उद्गच्छति तेन मोयस्मात्तस्माउत्तमः तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेणान
तृप्यामः अलमिति न समन्यामहे तत्र हेतुः यद्विक्रमं शृण्वतां यद्वा स्वेन तृप्यंतनामवयं तु नेति तत्र शाहस्या
त्वयः अयमर्थः देहाद्यल बुद्धिर्भवति उदराभरणेन वा रसमात्तानेन वा स्वादुविशेषाभावाद्वा न तु श्रु
णुतामित्यनेन श्रोत्रस्याकाशानान्नभरणमित्युक्तं रसज्ञानामित्यनेन वा ज्ञानतः पशुवत्तृप्तिरि
राकृता रसत्वेऽभावतावदुद्धमात्राभावेन तृप्तिं निराकरोति पदे पदे प्रतिक्षणं स्वादुतोऽपि स्वादु १९

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे १९ कृतवान्कि
लवीर्याणि सहरामेण केशवः अतिमर्त्यानि भगवान्गूढः कपटमानवः २० कलिमागत
माज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं आसीना दीर्घसत्रेण कथायां सक्षणा हरेः २१ त्वं नः संदर्शितो धात्रा
दुस्तरं निस्तितीर्षतां कलिं सत्वहरं पुंसां कर्णधार इवार्णवं २२ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये ध
र्मवर्मणि स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः २३ इति श्रीभागवते प्रथमस्कंधे प्रथमः १

अतः श्रीकृष्णचरितानि कथयेत्याशयेनाह कृतवानिति अतिमर्त्यानि अतिक्रांतानि गोवर्धनोद्धरणा
दीनि मनुष्येषु असंभावितानीत्यर्थः २० ननु यज्ञाध्यापनादिकमश्रवणं कृतपवश्रवणावकाशाः स्या
तत्राहुः कलिमागतं ज्ञात्वा नादृयाविसमपदं गत्वकाशाः दीर्घसत्रेण निमित्तेनासीना हरेः कथा
यां सक्षणाः कृतावसराः २१ अग्निहोत्रसमयेपलक्षितान्नमीश्वरेणोवसंपादितमिति अभिनंदति त्वमिति
कलिं निस्तर्तुमिच्छतां अर्णवं तितीर्षतां कर्णधारो नाविक इव २२ पुनः प्रश्नांतरं ब्रूहीति धर्मस्य वर्म
णि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः अस्य चोत्तरं कृष्णे स्वधामोपगते
धर्मज्ञानादिभिः सहोत्ययेश्लोक २३ प्रथमस्कंधे प्रथमोध्यायः १

५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तरेवं प्रथमेऽध्याये षट् प्रश्ना मुनिभिः कृताः द्वितीये तु ततः सूतः चतुर्णामाह तेष्वथ विप्राणामिति एवं
भूतैः सम्यक्कृतप्रश्नैः सम्यक्हृष्टः रोमहर्षणस्य पुत्रः उग्रश्रवाः तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपक्रान्तवान् प्र
वचनस्योपक्रमे गुरुदेवतानमस्कार इति तमाह त्रिभिः १ तत्र स्वगुरोः श्रीशुकस्य सर्वतन्मयत्वरितेनैव प्रणमन्नाह
यं प्रव्रजन्तं संन्यस्य गच्छन्तमनुपेतं मा उपनयनसंस्कारेति उपनयनार्थमनुपास्य तं यद्वा केनाप्यनुयेनैव गतमेका
किनमित्यर्थः तत्र हेतुः अपेतकृत्यं कृत्यशून्यं कर्ममार्गे प्रवर्तमानेनैष्ठिकमान् द्वैपायनः श्रीव्यासदेवः
विरहात्कातरो भीतः पुत्र इति [illegible] नेनाजुहाव आहूतवान् वृक्षादाह्वाने तन्मयतया पितृसंधिवार्थः तदा

व्यास उवाच इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे १ सूत उ
वाच यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव पुत्रेति तन्मयतया तरवोऽभिने
दुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि २ यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितिती
र्षतां तमोऽन्धं संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां ३॥

तन्मयतया श्रीशुकदेवरूपतया तरवोऽभिनेदुः हस्ताः प्रत्युत्तरं चक्रुः(मुक्तं) वनेः पितुः स्नेहानुबंधपरिहाराय यो
हृत्तरूपेणोत्तरं दत्तवानित्यर्थः तं मुनिमानतोऽस्मि तन्मयतायामुपपादनाय विशेषणं सर्वभूतानां हृत्मनः
श्रयते योगबलेन प्रविशतीति सर्वभूतहृदयः तं २ कृपालुतां दर्शयन्नाह य इति अन्धं गाढं तमः संसाराख्यम्
तितर्तुमिच्छतां पुराणानां मध्ये गोप्यं तत्र हेतुः अनन्यत्वाद्विशिष्टं सामान्यतिस्रः निजः असाधारणः अनुभवः
प्रभावो यस्य तत्स्वानुभावं अखिलश्रुतीनां सारं एकमद्वितीयमनुपममित्यर्थः आत्मानं कार्यलक्षणसंघा
तमधिकृत्य वर्तमानमात्मतत्त्वमध्यात्मं तस्य दीपं साक्षात्प्रकाशकमुपयामि शरणं व्रजामि ३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

6

श्री भाग॰ टी॰ ६

न पृच्छ्यतेनेन संसारमिति जयो ग्रंथः तं मुदीरयेदिति स्वयं तथोदीरयेन्न श्रन्यान्पौराणिकानुपपादयति ४
तेषां वचः प्रतिपूज्य इति यदुक्तं तत्प्रतिपूजनं करोति हे मुनयः साधु यथा भवति तथाहं पृष्टः यतो लो
कानां मंगलमेतत् यतः श्रीकृष्णविषयः संप्रश्नः कृतः सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णपर्यवसा
नादेवमुक्तं ५ तत्र यत्पृष्टं सर्वशास्त्रसारमेकांतिकं श्रेयो ब्रूहीति तत्रोत्तरमाह स वै पुंसामिति श्रयम
र्थः धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च तत्र यः स्वर्गाद्यर्थः स प्रवृत्तिलक्षणः सोऽपरः यतस्तु
धर्मात् श्रवणादिलक्षणा भक्तिर्भवति स परो धर्मः स एवैकांतिकं श्रेय इति कथंभूता अहैतुकी हेतुः

ँ नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ४ मुनयः साधु पृष्टो
ऽहं भवद्भिर्लोकमंगलं यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ५ स वै पुंसां परो धर्मो यतो भक्तिर
धोक्षजे अहैतुक्यप्रतिहता ययात्मा सुप्रसीदति ६ वासुदेवे भगवति भक्तियोगः प्रयोजितः जन
यत्याशु वैराग्यं ज्ञानं च यदहैतुकं ७ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः नोत्पादयेद्यदि रतिं
श्रम एव हि केवलं ८

फलानुसंधानं तद्रहिता अप्रतिहता विघ्नैरनभिभूता ६ ननु तन्मे वात्मानं वेदानु
वचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतिभ्यो धर्मस्य ज्ञानांगत्वं प्रसिद्धं तत्कु
तो भक्तिहेतुत्वमुच्यते सत्यं तत्तु भक्तिद्वारेणेत्याह वासुदेव इति अहैतुकं शुष्कतर्काद्यगोचरमौपनिषद
मित्यर्थः ७ व्यतिरेकमाह धर्म इति यो धर्म इति प्रसिद्धः स यदि विष्वक्सेनकथासु रतिं नोत्पादयेत् तर्हि स्वनु
ष्ठितोऽपि सन् श्रम एव श्रमो ज्ञेयः ननु मा तावत्स्यापि धर्मस्य श्रमत्वमस्त्वेवमत आह केवलं विफलश्रम इत्यर्थः
न चाल्पितत्वादिपि स्वर्गादिफलमित्याशंका एव कारेणोनिराकरोति त्वयि स्थितोऽपि ननु फलमित्यर्थः लिन्व ६

6A

स्तत्राप्यिस्वर्गादिफलमित्याशंक्य एवकारेण निराकरोति तायमुना न तत्फलमित्यर्थः ॥ नन्वत
थ्यर्हे वेवानुमीस्य यातिनः स्वर्गफलं भवतीत्यादि श्रुतेः न तत्फलस्य तायमुनामित्याशंक्याह द्विश्रा
द्वेवमाथयाति यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते इति तत्को सा
सूत्र ४ त्युग्रहीत याश्रुत्या तस्य प्रतिपादनात् ८ तदेवं श्रीहरिभक्तिद्वारा तदितरस्यैव श्रमप्याप्तमंनपर्य्यतः परोध
मेस्तुक्तं तस्यापकेविलेवस्मिन्नपि विश्वस्तु विरहामुत्रफलभोगवैराग्यं श्रेयस्तु समर्पितेषु धर्मस्यार्थः
फलं तस्य च कामः फलं तस्य चेन्द्रियप्रीतिः तत्प्रीतेश्च पुनरपि धर्मार्थादि परम्परेति ॥ यथाहुः धर्मादर्थ
श्च कामश्च स किमर्थं न सेव्यते इत्यादि तन्निराकरोति धर्मस्येति द्वाभ्यां आपवर्ग्यस्योक्तन्यायेनापवर्ग

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः नोत्पादयेद्यदि रतिं श्रम एव हि केवलं ८
धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ९
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः

पर्यन्तस्य श्रेयःफलत्वात् अर्थार्थो नोपकल्पते योग्यो न भवति तथार्थस्याप्येवंभूतधर्माव्यभिचारिणः का
मो लाभाय फलत्वाय न हि स्मृतो मुनिभिः ९ कामस्य विषयभोगस्येन्द्रियप्रीतिलाभः फलं न भवति
किं तु यावता जीवेत तावानेव कामस्य लाभः जीवनपर्यन्तं कामः सेव्य इत्यर्थः यदुक्तं आहारार्थं
कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसंधारणार्थं प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं
येन भूयो न दुःखमिति जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्यश्चेह प्रसिद्धः स्वर्गादि
रिह सोऽर्थो न भवति किं तु तत्त्वजिज्ञासैवेति १० ॥ ॥ श्रीराम ॥ श्रीराम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु वर्तते नित्यामानानाम धर्मं नित्यामेव ॥ ननु तत्त्वविदोपि विगीतवचना एव धर्मेपवहितत्वमिति केचि
त्तत्राह तत्त्वविदस्तु तदेव तत्त्वं वदंतीति किं तज्ज्ञानं नामाद्वयमिति क्षणिकविज्ञानपक्षं निवर्तयति
ननु तत्त्वविदोपि विगीतवचना एव नैवं तस्यैव तत्त्वस्य नामांतरैरभिधानमात्रमित्याह औपनिषदैर्ब्रह्मेति
हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानिति प्रतिपाद्यते ॥ तच्च तत्त्वं सम्यग्विचारयामकैर्वृक्षाद्यनेक
त्याह तत्त्वं श्रद्दधानाः ज्ञानवैराग्ययुक्तया यत्न श्रुतज्ञानं परोक्षं तच्च तत्त्वमात्मनि देहे क्षेत्रज्ञे पश्यंति किं तत्र आत्मा
नं परमात्मानं श्रुतेन वेदांतादिश्रवणेन गृहीतया श्रद्धयेति भक्तेर्दार्ढ्यं दर्शितं ॥१२ धर्मस्य फलं मुक्ति
वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ तच्छ्रद्द
धाना मुनयो ज्ञानवैराग्ययुक्तया पश्यंत्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥१२ अतः
पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं ॥१३ तस्मा
देकेन मनसा भगवान्सात्वतां पतिः श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥१४ यदनुध्यासि
ना युक्ताः कर्मग्रंथिनिबंधनं छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं ॥१५ शुश्रूषोः श्रद्दधान
नाथे कामादिकमितीममर्थमुपपद्योपसंहरति अत इति हे द्विजश्रेष्ठाः हरितोषणं हरेराराधनं संसि
द्धिः फलं यस्माद्भक्तिविहीनो धर्मः केवलं श्रम एव तस्माद्भक्तिप्रधान एव धर्मोनुष्ठेय इत्याह तस्मादि
ति ॥१३ एकेन एकाग्रेण मनसा ॥१४ भक्तिरहितो धर्मः केवलं श्रम इति प्रपंचितं इदानीं भक्तेः मुक्तिफल
त्वं प्रपंचयति यदिति यस्यानुध्यानमेवासिः खड्गः तेन युक्ता विवेकिनः ग्रंथिमहंकारं निबध्नाति यत्कर्म तत्त
च्छिंदंति तस्य कथायां रतिं प्रीतिं को न कुर्यात् ॥१५ ननु सत्यमेवं कर्मनिर्मूलिनी श्रीहरिकथारतिस्तथा

नुधा २

7A

ततः वशृण्वतामिति पुण्ये श्रवणकीर्तने यस्य सः सतां सुहृत् हितकारी हृदि यान्यभद्राणि कामा
दिवासनास्तानि विधुनोति अस्य हृदयस्थः क्लिन्नतीत्यर्थः १७ ततश्च नष्टप्रायेष्विति सर्वाभद्रनाशस्य ज्ञानो
त्तरकालत्वात् प्रायग्रहणं भागवतानां श्रीभागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्चला विक्षेपका
भावात् १८ रजस्तमसश्च ये च तत्प्रभवाभावाः कामादयः तैरनाविद्धं अनभिभूतं प्रसीदति उपशा
म्यति १९ भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तसंगस्य २० ज्ञानफलमाह भिद्यत इति हृ

शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां १७
नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी १८ तदा रज
स्तमोभावाः कामलोभादयश्च ये चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति १९ एवं प्रसन्नमनसो
भगवद्भक्तियोगतः भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जायते २० भिद्यते हृदयग्रन्थिश्छिद्यन्ते स
र्वसंशयाः क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे २१ अतो वै कवयो नित्यं भक्तिं परमया
मुदा वासुदेवे भगवति कुर्वन्त्यात्मप्रसादिनी २२ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः
पुरुष एक इहास्य धत्ते स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनो

दयमेव ग्रन्थिः चिज्जडग्रन्थनरूपोऽहंकारः अत एव सर्वसंशयाः असंभावनादिरूपाः कर्माण्यनारब्धफ
लानि आत्मनि सर्वरूपभूते ईश्वरे दृष्टे एवकारेण ज्ञानानन्तरमेवेति दर्शयति अत्र सदाचारं दर्शयन्नुप
संहरति अत इति आत्मनः प्रसादिनीं मनःशोधिनीं वासुदेवे भक्तिं कुर्वन्तीति भजनीयविशेषमाह
ष्ठितः २२ तदेवोपपादयति ब्रह्मादीनां त्रयाणामेकात्मत्वेऽपि वासुदेवस्याधिक्यमाह सत्त्वमिति २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

8

श्री भाग धरी ८

यद्यप्येक एव परः पुमानस्य विश्वस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं संज्ञाः केवलं भिन्ना धत्ते इह विवि
तिविहरतीति वक्तुमेवं निर्देशः तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्वतनोर्वासुदेवात्स्युः २३ उपा
धिविशेषेण फलवैशिष्ट्यं दृष्टान्तेनाह पार्थिवात्प्रवृत्तिप्रकाशरहितात् दारुणः काष्ठाद्धूमः प्र
वृत्तिस्वभावस्त्रयीमयो वेदोक्तकर्मप्रवर्तकः ईषत्कर्मप्रत्यासत्तेः तस्मादप्यग्निस्त्रयीमयः साक्षात्कर्मसा
धनत्वात् एवं तमसः सकाशाद्रजः रजसः सकाशात्सत्वं ब्रह्मदर्शनं ब्रह्मप्रकाशकं तु पार्थिवेन लया
त्मकत्वात्तमसः सकाशाद्रजसः सोऽप्याधिकत्वाद्धेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्व

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं २४ भेजि
रे मुनयोऽथाग्रे भगवन्तमधोक्षजं सत्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह २५ मुमुक्षवो घोर
रूपान्हित्वा भूतपतीनथ नारायणकलाः शान्ताः भजन्ति ह्यनसूयवः २६ रजस्तमःप्रकृतयः
समशीला भजन्ति हि पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः २७ ॥

धात्तत्प्रकाशकत्वं विक्षेपकत्वात् एवमेतस्मात्ताद्ब्रह्मदर्शनं भगवतः सत्वगुणोपाधीनां ब्रह्मादीनामपि य
थोत्तरं वैशिष्ट्यमिति भावः २४ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिर इति अथो तां हेतोरग्रे पुरा विशु
द्धसत्वमूर्त्तिं भगवन्तमधोक्षजं अतो ये तानेवानुवर्तन्ते ते इह संसारे क्षेमाय कल्पन्ते २५ ननु अन्यानपि केचि
द्भजन्तो दृश्यन्ते सत्यं मुमुक्षवस्तु तान्न भजन्ति किन्तु सकामा एवेत्याह मुमुक्षव इति द्वाभ्यां भूतपतीनिति
पितृप्रजेशादीनामुपलक्षणं अनसूयवो देवतान्तरानिन्दकाः सन्तः २६ रजस्तमसी प्रकृतिः स्वभावो ये ८
षां ते अत एव पितृभूतादिभिः समं शीलं येषां ते श्रिया सहैश्वर्यं प्रजाश्चेप्सन्तीति तथा ते २७ ॥

8A

मोक्षपरत्वाद्धमुख्यो भजनीय इत्युक्तं सर्वेषां शास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां वासुदेवः परः ता-
त्पर्यगोचरो येषां ते ननु वेदा मखपरा दृश्यंते इत्याशंक्य तेपि तदाराधनार्थत्वात् तत्परा एव इत्युक्तं
योगा योगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्प्राप्त्युपाय-
त्वेन तत्परत्वमुक्तं २८ ज्ञानं ज्ञानशास्त्रं ननु तत्तु ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं तपोत्र
ज्ञानं धर्मो धर्मशास्त्रं दानव्रतादिविषयं ननु तत्स्वर्गपरमित्याशंक्य गम्यत इति गतिः तत्स्वर्गादि
फलं सोपि तदानंदांशरूपत्वात्तत्परैवेत्युक्तं यद्वा वेद इत्यनेनैव तन्मूलानां सर्वेषामपि वासु-

वासुदेवपरा वेदा वासुदेवपरा मखाः वासुदेवपरा योगा वासुदेवपराः क्रियाः २८ वासुदेव
परं ज्ञानं वासुदेवपरं तपः वासुदेवपरो धर्मो वासुदेवपरा गतिः २९ स एवेदं ससर्जाग्रे भगवाना
त्ममायया सदसद्रूपया चासौ गुणमय्या गुणो विभुः ३० तया विलसितेष्वेषु गुणेषु गुण
वानिव अंतःप्रविष्ट आभाति विज्ञानेन विजृंभितः ३१ ॥ देवपरत्वमुक्तं ननु तेषां मखा

योगक्रियादीनां नानार्थपरत्वात्कृतदेकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति
द्रष्टव्यं २९ ननु जगत्सर्गप्रवेशनियमनादिविलासयुक्ते वस्तुनि ब्रह्मणि सर्वेषां शास्त्रसमन्वयो दृश्य-
ते कथं वासुदेवपरत्वं सर्वस्येत्याह स एवेति चतुर्भिः एतैरेव श्लोकैस्तस्य कर्माण्युदाराणि ब्रूहीति प्र-
मुक्तं श्नस्योत्तरं सदसद्रूपया कार्यकारणात्मिकया गुणाश्चैतन्वयः स्वतो निर्गुणोपि सन्नित्यर्थः ३०
भगवतो जगत्कारणत्वमुक्तं प्रवेशनियमन तत्तल्लीला माह तयेति विलसितेष्वेषु गुणेषु स्वका-
र्यादिष्वंतः प्रविष्टः सन् गुणवानिव मद्धीना एते गुणा इत्यभिमानवानिव न तु वस्तुतस्तथा यतो

विज्ञानेन विजृंभमाणानिर्गुणोमितः ३१ ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाप्र
टीं ४

वद्रूपवलीलामाहयथेति स्वयोनिषुस्वाभिव्यंजकेषुअवहितोनिहितः विश्वात्मापुमान्परमेश्वरोभूते
षुप्राणिषुतथाभिन्नोपिप्रतियोनिनानोनानात्मवदुपलभ्यते ३२ एवंतद्रूपेणभोगलीलामाह असौआ
विर्भूतसूक्ष्माणिवेंद्रियाणिवात्माचमनस्तैः स्वनिर्मितेषुभूतेषुविविधभुङ्क्तेभोगेस्वातंत्र्यंदर्शयतितद्गु
णांस्ततत्तद्रूपाविषयानितिक्रियाभुंक्तेभोजयतीतिवि ... णयेवान्वयः पालयतीतिवातद्गमनेपद्मा
वंभुंजीवनेइतिस्मरणात् ३३ इदानींसत्तनामासीतिश्लोकांतरमाह भावयतिपालयतिपतन्नुसत्त्वेनाव
तारमात्राधारणाप्रयोजनं विशेषतः कुलावतारस्यक्रतोस्तुतोवक्ष्यतिलोकभावनः लोककर्तादेवा

यथाह्यवहितोवह्निर्दारुष्वेकःस्वयोनिषु नानेवभातिविश्वात्माभूतेषुचतथापुमान् ३२ अ
सौगुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान् ३३ भाव
यत्येषसत्त्वेनलोकान्वैलोकभावनः लीलावतारानुरतोदेवतिर्यङ्नरादिषु ३४ इतिश्रीभागव
तेप्रथमस्कंधेद्वितीयोध्यायः २ सूतउवाच जगृहेपौरुषंरूपंभगवान्महदादिभिः संभूतंषोडश
कलमादौलोकसिसृक्षया १

दिषुयेलीलावताराःतेष्वनुरक्तः ३४ इतिश्रीभावार्थदीपिकायांप्रथमेद्वितीयोध्यायः २ अवतारक
था कुमारादिप्रश्नोत्तरीयत्नत्रयाभिधायपुरुषाद्यवतारोक्त्यानन्तरचारित्रवर्णनैः षडके अथाख्याहि
हरेर्धीमन्नवतारकथाःशुभाइतितत्रउत्तरमनेननानावतारानन्नुक्रमिष्यन्प्रथमंपुरुषावतारमाह जगृहेइ
तिपंचभिःमहदादिभिर्महदहंकारपंचतन्मात्रैरेकादशेंद्रियाणिपंचमहाभूतानीतिषोडशकलाश्रयाय
तिपंचभिःमहदादिभिर्निमित्तंपंचभूतानि तथापिविराट्जीवांतर्यामित्वेनभगवतोविराड्रूपेणोपासनार्थं
मिन् ननुयद्यपिभगवद्विग्रहोनैवंभूतः तथापिविराड्जीवांतर्यामिणोभगवतोविराड्रूपेणोपासनार्थं

[illegible] ८

9A

कोसौ भगवानित्यपेक्षायां तं विशिनष्टि यस्येत्यंभसि एकार्णवे शयानस्य विश्वं तस्य तत्र योगः
समाधिः तद्रूपां निद्रां विस्तारयतस्तस्य नाभिरेव हृदः तस्मिन्यदंबुजं तस्मात्सकाशाद्ब्रह्मासीत्तत्र
भूतपाद्येकल्पेयोरूपंरूपंनशृद्दे २ कीदृशं तद्रूपं तदाह यस्येति ननु कीदृशो विग्रहस्तस्य योंभसि शे
ते तमत्राह तत्तस्य भगवतो रूपं विशुद्धं सत्त्वं प्रत्यक्षमभिन्नं प्रतपवोर्जितं निरतिशयं सत्त्वं परं च्छ्रेया
गिनां प्रत्यक्षमित्याह पश्यंतीति ३ अदभ्रं अनल्पं ज्ञानात्मकं यच्चक्षुस्तेन सहस्रमपरिमिता

यस्यांभसि शयानस्य योगनिद्रां वितन्वतः नाभिहृदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः २
यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ३ पश्यं
त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्धश्रवणाक्षिनासिकं सहस्र
मौल्यंबरकुंडलोल्लसत् ४ एतन्नानावताराणां निधानं बीजमव्ययं यस्यांशांशेन सृज्यं
ते देवतिर्यङ्नरादयः ५ ॥

नियानि पादादीनि तैरद्भुतं सहस्रं मूर्धादयो यस्मिंस्तत्सहस्राणि मौल्यादीनि तैरुल्लसच्छोभमानं ४
एतच्च क्रूरस्थं न तु स्यावतारवदाविर्भावतिरोभाववदित्याह एतदिति नानावताराणां रूपाणि निधीयंते। न्न
स्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः बीजमुद्गमस्थानं बीजत्वेपि नो बीजवत्तुल्यं
किं तत्र यस्य न केवलमवताराणामेव बीजं किंतु सर्वप्राणिनामित्याह यस्यांशो ब्रह्मा तस्यांशेन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी० १०

सनत्कुमाराद्यवतारांस्तच्चरितं चाह स एवेति कौमारस्सर्गः प्राजापत्यो मानवः इत्यादीनि सर्गविशेष
नामानि यैः पौरुषं रूपं गृहीत्वा स एव देवः कौमाराख्यं सर्गमाश्रितः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं च
चार प्रथमद्वितीयादिष्वखंडितमिदं यथा चापदतया ६ अस्य विश्वस्य भवायोद्भवाय महीमुद्धरिष्यन्निति
कर्मोक्तिः एवं सर्वत्रावतारकर्म चोक्तमित्यनुसंधेयं ७ नारदावतारमाह तृतीयमिति ऋषिसर्गमु
पेत्य तत्र देवर्षित्वमुपेत्य अयमर्थः सात्वतं वैष्णवं तंत्रं पांचरात्रागमम् आचष्ट उक्तवान् यतस्तेनाभिगीतं कर्म
बंधहेतुर्नैव भवति तानि कर्माणि तेषां भावो नैष्कर्म्यं कर्मणामेव मोचकत्वं यतो भवति तदाचष्ट इत्यर्थः

स एव प्रथमं देवः कौमारं सर्गमाश्रितः चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं ६ द्वितीयं तु भ
वायास्य रसातलगतां महीं उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ७ तृतीयमृषिसर्गं वै
देवर्षित्वमुपेत्य सः तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८ तुर्ये धर्मकलासर्गे नरनारा
यणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ९ पंचमः कपिलो नाम सिद्धेशः कालविप्लु
तं प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया

तुर्येऽवतारे धर्मस्य भार्यायाः कलाया (आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ र्गेत्यर्थः अथो
वा पृथगात्मनो यत्वाद्द्वाविति स्वकौ तेः तस्याः सर्गे ऋषिर्भूत्वा तप एकावतारत्वं दर्शयति ९ कपिलावता
रमाह पंचम इति आसुरये नाम्ने ब्राह्मणाय तत्त्वानां ग्रामस्य संघस्य निर्णीयाय यस्मिं स्तत्सांख्यं १० द
त्तात्रेयावतारमाह षष्ठ इति अत्रेरपत्यत्वं तेनैव वृतः सन् प्राप्तः अत्रेरपत्यमभिकांक्षतः आह तुष्ट इति व
द्गमाराधनात् कथं प्राप्तोऽनसूयया मत्सदृशमपत्यमिष्टमामेवापत्यं हृतवानिति दोषदृष्टिमकुर्वन्नित्र

॥ आन्वीक्षिकीमात्मविद्यां प्रह्लादादिभ्यश्च ॥

10A

यज्ञावतारमाह ततइति सयज्ञोयामाद्यैः स्वैरेवपुत्रैर्यामानामदेवास्तदाद्यैः सहस्वायंभुवंनाममन्वंत
रंयात्पालितवान् ततः स्वयमिंद्रोभूदित्यर्थः १२ ऋषभावतारमाह अष्टमेतिसर्वाश्रमनमस्कृतमंत्या
श्रमंपारमहंस्यंवर्त्मधीराणांदर्शयन्नाभेराग्नीध्रपुत्रात्‌ऋषभोजातः १३ पार्थिवंवपुः राजदेहं पृ
थुरूपंपाठांतरेपृथोरिदंपार्थिवं ओषधीर्विप्रुपलदाताइमांपृथिवींसर्वाणिवस्तूनिदुग्धवान्सगा

ततःसप्तमआकूत्यांरुचेर्यज्ञोभ्यजायत सयामाद्यैःसुरगणैरपात्स्वायंभुवांतरं १२ अष्टमे
मेरुदेव्यांतुनाभेर्जातउरुक्रमः दर्शयन्वर्त्मधीराणांसर्वाश्रमनमस्कृतं १३ ऋषिभिर्याचि
तोभेजेनवमंपार्थिवंवपुः दुग्धेमामोषधीर्विप्रास्तेनायंसउशत्तमः १४ रूपंसजगृहेमा
त्स्यंचाक्षुषोदधिसंप्लवे नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुं १५ सुरासुराणामु
दधिंमथ्नतांमंदराचले दध्रेकमठरूपेणपृष्ठएकादशे
विभुः १६ ॥

दोहहेतेनसोयमवतारउशत्तमःकमनीयतमःव
साभावस्त्वार्थः हेविप्रास्तेनपृथ्वी
शाकांतावित्यस्मात् १४ मत्स्यावतारमाहरूपमितिचाक्षुषमन्वंतरेयउदधिसंप्लवःतस्मिन्नप्यपि
मन्वंतरावसानेप्रलयोनास्ति तथापिकेनचित्कौतुकेनसत्यव्रतायमायादर्शिता यथाःकोरेमार्कं
डेयायेतिद्रष्टव्यंमहीमय्यां नाविनौकारूपायांमह्यामित्यर्थः अपाद्रक्षितवान्वैवस्वतमितिभा
विनीसंज्ञा १५ कूर्मावतारमाहसुरेतिकमठःकूर्मःतद्रूपेणैकादशोवतारेविभुर्दध्रेदधार १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी०
११

धान्वंतर्यवतारमाह धान्वंतरमिति धान्वंतरं धन्वंतरिरूपं द्वादशमं मादिभ्योगात्स्वार्थः त्रयोदशमेव रूपं
न चैतेन समहदर्शी धातृस्रपाययदित्यग्रसुधामित्यध्याहारः मोहिन्याख्यस्त्रिया रूपेणान्यांश्चासुरान्मोहयन्
नु धान्वंतरीरूपेणामृतमानीय मोहिन्या पाययदित्यर्थः १७ नृसिंहावतारमाह चतुर्दशमिति नारसिं
हस्य रूपं बिभ्रत् एरकेनिग्रथितृणं १८ वामनावतारमाह पंचदशमिति छलेनामदं वामयतीति वाम
नरूपं कृत्स्नं वाग्रत्वादत्स्नः तस्माद्दैत्यक्रियग्रहीतुमिच्छुः १९ परशुरामावतारमाह अवतारइति त्रिःत्रि

धान्वंतरं द्वादशमं त्रयोदशममेव च अपाययत्सुरानन्यान्मोहिन्या मोहयत्स्त्रिया १७ चतुर्दशं
नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं ददारकरजैर्वक्षस्येरकां कटकृद्यथा १८ पंचदशं वामनकं कृत्वा
गादध्वरं बलेः पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं १९ अवतारे षोडशमे पश्यन्ब्रह्म
द्रुहो नृपान् त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं २० ततः सप्तदशे जातः सत्यवत्यां
पराशरात् चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः २१ नरदेवत्वमापन्नः सुरकार्यचिकीर्ष
या समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं २२ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी
रामकृष्णाविति भुवो भगवानहरद्भरं २३ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां बुद्धो नाम्ना
जिनसुतः कीकटेषु भविष्यति २४

तं यद्यो भवति त्वयम सवारानेकविंशतिवारानित्यर्थः २० व्यासा-
वतारमाह तत इति अल्पमेधसोऽल्पप्रज्ञान्पुंसो दृष्ट्वा तदनुग्रहार्थं शाखावेदस्य चक्रे रामावतारमाह नरदेवत्व
राजरूपेण प्राप्तः सन् २२ अतः परं षोडशो रामकृष्णावतारमाह विंशतितम इति वक्तव्ये तकारलो
पः छंदोनुरोधेन रामकृष्णाविति एवं जन्मनी प्राप्य २३ अजिनस्य सुतः जिनसुत इति पाठे जिनः स एव

77A

कल्क्यवतारमाह युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात्सकाशाज्जनिता जनिष्यते अत्र च सर्वसंग्रहा
र्थमाह अवतारा इति २५ असंख्येयत्वे दृष्टांतः यथेति अविदासिनः ऽपक्षयशून्यात्सरस उपक्षयेयस्मात्
सरसः सकाशात्कुल्याः स्वल्पप्रवाहाः २६ विभूतीराह ऋषय इति तत्र च विशेषमाह एते चेति पुंसः परमेश्वर
स्यैकैकदेशाः केचित्कलाः विभूतयः अत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोग
मेव ज्ञानक्रियाशक्त्याविष्करणं कुमारनारदादिषु यथोपयोगमंशकलावेशः पृथ्वादिषु शक्त्यावेशः

अथासौ युगसंध्यायां दस्युप्रायेषु राजसु जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः २५ अ
वतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः २६ ऋ
षयो मनवो देवा मनुपुत्रा महौजसः कलाः सर्वे हरेरेव सप्रजापतयस्तथा २७ एते चांशकलाः
पुंसः कृष्णस्तु भगवान्स्वयं इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे २८ जन्म गुह्यं भगवतो य
एतत्प्रयतो नरः सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते २९

कृष्णस्तु भगवान्साक्षान्नारायण एवाविर्भूतः सर्वशक्तित्वात् सर्वेषां प्रयोजनमाह इंद्रारयो दैत्यास्तैर्व्या
कुलमुपद्रुतं लोकं मृडयंति सुखयंति २८ एतत्कीर्तनफलमाह जन्मेति गुह्यमतिरहस्यं जन्म प्रयतः
शुचिः सन् दुःखग्रामात्संसारान्मुच्यते इत्युक्ते तत्र कथं देहद्वयसंबंधे सति तद्विमुक्तिर्विद्याशक्त्या देहद्व
यसंबंधस्य भगवन्मायोपाध्याः अविद्याविलसितत्वात् तच्छ्रवणादिजनितविद्यया तन्निवृत्तिरुपपद्यते
इत्याशयेनाह एतदिति पंचभिः २९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी.
१२

अरूपस्याविवेकरमस्यात्मनोजीवस्यैनस्थूलंरूपंशरीरंभगवतोयामायातस्यागुणैर्महदादिरूपैर्विर
चितंकृतात्मनिश्रात्मस्थानेशरीरंकृतमित्यर्थः ३० कथमित्यपेक्षायांस्वरूपावरणेनतदध्यासइति
सदृष्टांतमाह यथावाश्राश्रितोमेघौघोनभसिआकाशेऽबुद्धिभिरारोपितः यथावापार्थिवोरेणु
रनिलेधूसरत्वादिस्थितिले एवंद्रष्टर्यात्मनिदृश्यत्वंदृश्यत्वादिधर्मकंशरीरमारोपितं ३१ अतःस्थूला
द्रूपात्परमन्यदपिरूपमारोपितमित्यनुषंगः कथंभूतंतत्यदव्यक्तंमसूलांनजातंइत्यतः अव्यूढगुणबृं
हितंव्यूढःकरचरणादिपरिणामः तयाअप्रविणाताअव्यूढागुणास्तैर्बृंहितंरचितंआकारविशे
षरहितत्वात्अव्यक्तमित्यर्थः एतदेवकुतइत्याह अदृष्टाश्रुतवस्तुत्वात्आकारविशेषवद्वस्तुभावात

एतद्रूपंभगवतोह्यरूपस्यचिदात्मनः मायागुणैर्विरचितंमहदादिभिरात्मनि ३० यथान
भसिमेघौघोरेणुर्वापार्थिवोनिले एवंद्रष्टरिदृश्यत्वमारोपितमबुद्धिभिः ३१ अतःपरंयदव्य
क्तमव्यूढगुणबृंहितं अदृष्टाश्रुतवस्तुत्वात्सजीवोयत्पुनर्भवः ३२ यत्रेमेसदसद्रूपेप्रतिषिद्धेस्व
संविदा अविद्ययात्मनिकृतेइतितद्ब्रह्मदर्शनं ३३ यद्येषोपरतादेवीमायावैशारदीमतिः
संपन्नएवेतिविदुर्म हिम्निस्वेमहीयते

यदेवाकारविशेषवद्वस्तुनरस्मदादिवद्दृश्यतेश्रूयतेवाइंद्रादिवदिदंतुनतथानहितस्यस्थूलस्येवकिंप्रमाणं
तत्राह सजीवोजीवोपाधिःजीवोजीवेननिष्क्रमेः जीवोजीवंविहायेत्यादौ जीवोपाधौलिंगदेहेजीव
शब्दप्रयोगात्जीवोपाधितयाकल्प्यतइत्यर्थः ननुस्थूलस्यैवभोगायतनत्वाज्जीवोपाधिरस्तु किमन्य
कल्पनयेत्यतआहयद्यस्मात्स्थूलात्पुनर्भवः पुनर्जन्मोत्क्रांतिगत्यादीनांतेनविनाऽसंभवादितिभावः ३२
एवमुपाधिद्वयमुक्त्वातदपवादेनजीवस्यब्रह्मतामाह यत्रयदेमेस्थूलसूक्ष्मेरूपेस्वसंविदास्वरूपसम्य

क्ज्ञानेनप्रतिषिद्धेभवतः ज्ञानेनप्रतिषिद्धत्वेनमेवहेतुमाह अविद्ययात्मनि
कृतेइतिहेतुः नतुस्वतस्तदाजीवोब्रह्मैवभवतीत्यर्थः कथंभूतंदर्शनंज्ञानैकस्वरूपं ३३ १२

तथापि भगवन्मायायाः संसृतिकारणत्वाविद्यमानत्वात्कथं ब्रह्मतातत्राह यदीति असंदेहे संदेहवचनं
यदि वेदाः प्रमाणास्युर्वातिवनैवेशारदी विशारदः सर्वज्ञ ईश्वरः तदीया देवी स्वभावचक्रेण क्रीडेनोप
वामायायद्युपरता भवति [illegible] किमित्युपरता भवेत् तत्राह मतिर्विद्याऽश्रयं भावः यावदविद्यात्मना वर
णविक्षेपौ करोति तावन्नोपरमति यदा तु सैव विद्यारूपेण परिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा
निरिंधनाग्निवत्स्वयमेवोपरमे[illegible]दिति तदा संपन्नो ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः किम २५
तोऽयं सुखस्वभावोऽपि परमानंदस्वरूपे महीयते इत्यस्ते विराजते इत्यर्थः यथा जीवस्य जन्मादि मायया
एवमीश्वरस्यापि जन्मकर्मादि मायेत्याह एवमिति ३४ प्रकृतेः कर्माण्यकर्तुरजस्य जन्मानि हृत्प

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ३५ स वा
इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं
जिघ्रति षड्गुणेशः ३६ न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः नामानि रू
पाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ३७ स वेद धातुः पदवीं परस्य दुरंतवीर्य
स्य रथांगपाणेः योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ३८ ॥

तेरंतर्यामिणः ३५ तर्हि जीवादीश्वरस्य को विशेषः स्वतंत्र एव विशेष इत्याह स वा इति षाड्वर्गि
कं षडिंद्रियवर्गविषयं जिघ्रति दूरादेव गंधवहः गृह्णाति न तु सज्जते इत्यर्थः कुतः षड्गुणेशः षडिंद्रिय
नियंता ३६ ननु किमीश्वरस्य सृष्ट्यादिकर्मभिर्विषयभोगो वा तत्राह न चेति धातुर्जगद्विधातुरीश्व
रस्योतीरनेका लीलाः कुमनीषः कुबुद्धिर्निपुणेन तर्कादिकौशलेन नावैति जानाति मनसा रूपा
णि वचसा नामानि संतन्वतो निस्सारयतो वचोभिरिति बहुवचनं बहुत्वाभिप्रायेण मनोवचोभिः
संदेहनिवा ३७ भक्तस्तु कथं विजानातीत्याह स वेद इति अमायया अकौटिल्यभावेन संततयानि

13

श्री
भाग
टी
१३

भक्तिमार्गेणा प्रवृत्तानृषीनभिनंदति अथेति यतो भक्त एव भगवत्तत्त्वं जानाति अतो भगवंतः सर्वज्ञाः
भवंतो धन्याः कृतार्थाः कुतः यद्यस्मादित्थं प्रवर्तमाना वासुदेवे आत्मभावं मनोवृत्तिं कुर्वंति सर्वात्मकमे
कांतिकं यस्मिन्नात्मभावे सति भूयः परिवर्तो जन्ममरणाद्यावर्तो न भवति ३९ सूत्रवित्मेनतदाख्यं प्रश्नं एवं क
थयसीत्याह इदमिति ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकस्य चरितं यस्मिंस्तत् ऋषिः व्यासः ४० तत्स

अथेह धन्या भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः
परिवर्त उग्रः ३९ इदं भागवतं नाम पुराणं ब्रह्मसंमितं उत्तमश्लोकचरितं चकार भगवानृ
षिः ४० निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् तदिदं ग्राहयामास सुतमात्मवतां वरं
४१ सर्ववेदेतिहासानां सारं सारं समुद्धृतं स तु संश्रावयामास महाराजं परीक्षितं ४२ प्रायोप
विष्टं गंगायां परीतं परमर्षिभिः कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ४३ कलौ नष्टदृ
शामेष पुराणार्कोऽधुनोदितः तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ४४ अहं चाध्यगमं तत्र
निविष्टस्तदनुग्रहात् सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति ४५ इति श्रीभागवते
महापुराणे प्रथमस्कंधे तृतीयोऽध्यायः ३ ॥

स्वस्त्ययनं मंगलं तदिदमिति सुतं शुकं ४१ प्रायेणामरणपर्यंतमनाशकेनोपविष्टमिति वैराग्योक्तिः ४२
हे विप्रा विप्रर्षेः सकाशात् ४४ अध्यगमं ज्ञातवान् किं तत्र कीर्तयतस्तत्र निविष्टः श्रोतृत्वेनावस्थितः
यदा तु त्रिरभ्यासात् बोधः यथाधीतं न तु स्वमतिविलसितं तथापि यथामति स्वमत्यनुसारेण संक्षेपतः कथितं
विस्तारतः श्रावयिष्यामि ४५ ॥ इति श्रीभावार्थदीपिकायां प्रथमे तृतीयः ३ ॥ १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

13A

तेयैभागवतीं रेभकारणेनेनवर्णिते व्यासस्यापविनो षक्नुतपः प्रवचनादिभिः इत्येवं प्रसन्नतया श्रावयि
ष्यामीति श्रुत्वा तान्मुनीनां वहूनां मध्ये एकेन वक्तव्ये यो वृद्धः वृद्धेष्वपि वृद्ध एषः कुलपतिर्वर्गमुख्यः
तेष्वपि वृद्धश्रयो वहूचः ऋग्वेदी तेन वक्तव्यं श्रुत एवंभूतत्वात् शौनकोऽब्रवीत्। यद्यो कथामाह २ क
स्मिन्स्थाने केन हेतुनेति महाभारतादिधर्मशास्त्राणि कृतवतो मुनेरेतत्संहिताकरणे इत्यर्थः कृत इ
तिसावैविभक्तिकस्तसिः केन प्रवर्तित इत्यर्थः कस्मो व्यासः यदुके सततसंश्रावयामासेतितेन तत्र

व्यास उवाच इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां वृद्धः कुलपतिः सूतं बह्वृचः शौनको
ब्रवीत्। शौनकः सूत सूत महाभाग वद नो वदतां वर कथां भागवतीं पुण्यां यदाह भगवान्
शुकः २ कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना कुतः संचोदितः कृष्णः कृतवान्संहितां मु
निः ३ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः एकांतमतिरुन्निद्रो गूढो मूढ इवेयते ४
दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं तद्वीक्ष्य पृच्छति मुनौ
जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ५ कथमालक्षितः पौरैः संप्राप्तः कुरुजां
गलान् उन्मत्तमूकजडवत्
वद्विचरन्गजसाह्वये ६

कस्य व्याख्यानादिके कथं चरितमिति प्रश्नेऽस्य प्रसंगो दासीनंदनाख्याहद्वाभ्यां तस्येति समदृक् समं
ब्रह्मेति पश्यतीति ब्रह्मैव निर्विकल्पकः स्वार्थे कः निरस्तभेदः किं चैकस्मिन्नेव तः समाधिर्यस्य एवंभूता
मतिर्यस्य सः यतउन्निद्रः मायाशयनादुद्बुद्धः या निशा सर्वभूतानां तस्यां जागर्ति संयमीति स्मृतेः प्र
तपवगूढो प्रकृतो मूढ इव प्रतीयते ४ निर्विकल्पत्वं प्रपंचयति दृष्ट्वेति आत्मजे शुके प्रव्रजते श्र
यांतमनुगच्छंतमृषिं व्यासं प्रनग्नमपि दृष्ट्वा न लज्जाईं इत्यप्सरसो ह्रिया लज्जया वस्त्रपरीधाने

विक्षिप्तादेर्ह्रियश्च ५ एवंभूतोऽसौ कथमालक्षितो ज्ञातः कुरुजांगला
न्देशविशेषान् संप्राप्तः उन्मत्तो मनसा मूको विचरन् गजाह्वये हस्तिनापुरे
नामनगरे ... हस्तिनापुरे ...

कृतवंतः अनग्नमपि त्वनेनार्यांतं ... कृतं नग्नस्य पुत्रस्य गच्छतः सुतस्य
ह्रिया न परिदधुः तच्चित्रं वीक्ष्य स्त्रीपुंसमानितिभिदा भेदस्तवास्ति वि

किकारणं४

14

श्री भाप्र टी० ९५ आतांव्यासजन्मकथनपूर्वकंशुकजन्माह ९

प्रायोपवेश नं ४

एवंभूतेन मुनिना सह यत्र संवादे एषा सात्वती भागवती श्रुतिः संहिता ७ एतेस्याश्चर्याय नेवरकालम्य स्या
नावेदं तस्य तेक ग्रावस्या नंदुर्लभमित्याह स इति गोदोहनमात्रकालं प्रतीतेतदपि नभित्यर्थः किं त
तेषां गृहाश्रमिणां गृहं तीर्थीकुर्वन् तीर्थस्तीर्थं इव पवित्रीकुर्वन् तस्माद्देवं भूतानां च वक्तो त्वाश्चर्यं श्रोता
स्त्विच्छास्तमनीवाश्चर्ययुतेनः कथयेत्याह अभिमन्युसुतमिति पंचभिः गृणीहि कथय ९ स संप्रा
ट् चक्रवर्ती वेति वितर्के कस्य वा हेतोः कस्मात्कारणात् अधिराट् श्रियं अधिकाराश्चोश्रियं संपद

वावोस्तात्मसमर्पकोरस्या

कथं वा पांडवेयस्य राजर्षेर्मुनिना सह संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ७ स गोदो
हनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमं ८ अभिमन्युसुतं
सूत प्राहुर्भागवतोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ९ स सम्राट् कस्य वा
हेतोः पांडूनां मानवर्धनः प्रायोपविष्टो गंगायामनादृत्याधिराट् श्रियं १० नमंति यत्पा
दनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः कथं स वीरः श्रियमंग दुस्त्यजां युवैषतो
त्स्रष्टुमहो सहासुभिः ११ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः जी
वंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं १२ तत्सर्वं नः समाचक्ष्व पृष्टो यदि

ह किंचन मन्ये त्वां विषये ८

म्नादृत्य १० यस्य पादनिकेतं चरणापीठं हस्तं धनान्यानीय शत्रवो नमंति श्रंगहेस्त युवा तत्रणप
वयस्वतपेन्नुव प्राणैसमात्मने परं असुभिः प्राणैः सह ११ किं तस्य किं धनादिभिरितिचेत्तत्राह लोकस्य
शिवाय सुखाय भवाय भूतये समृद्धये ये प्रवर्तते जीवंति न त्वात्मार्थं एवं सति सोयत्रा निर्विद्य विर
स्य अपि परस्य आश्रयं कलेवरं कुतो मुमोच न हि परोपजीवने स्वपं नृ कृमुचितमित्यर्थः यत्किंचन ९

छो सितं तत्सर्वमस्माकं समाचक्ष्व यद्यस्माद्वाचां विषये स्नातं पारंगतं त्वां मन्ये छां
दसादन्यत्र वैदिकव्यतिरेकेण त्रैकाणिकवान् १३ कस्मिन्युगे इत्यादिषु

१२

द्वापरे समनुप्राप्ते एकदेशतया हे तृतीये युगस्य पर्यये परिवर्ते वासव्यां सुपरिचरस्य वसोर्वीर्याज्जा-
तायां सत्यवत्यां योगी तानीत्यास्मो जातः १४ स सरस्वत्या उपस्पृश्य जले स्नानादिकं कृत्वेति शेषः आसीनो
बभूवेति शेषः विविक्तदेशे इत्यादि विविक्तैकान्तप्रार्थसुक्तं अनेनैव बदरिकाश्रमस्थानं सूचितं १५ तत्र स-
श्च युगधर्माणां व्यतिकरं वीक्ष्य सर्ववर्णाश्रमाणां यद्धितं तद्ध्याविति वृत्तीयेनान्वयः परावरज्ञे

द्वापरे समनुप्राप्ते तृतीये युगपर्यये जातः पराशराद्योगी वासव्यां कलया हरेः ॥१४॥
स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः विविक्त एक आसीन उदिते रविमण्डले ॥१५॥ परावर-
ज्ञः स ऋषिः कालेनाव्यक्तरंहसा युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥१६॥ भौतिकानां च
भावानां शक्तिह्रासं च तत्कृतं अश्रद्दधानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः ॥१७॥ दुर्भगांश्च ज-
नान्वीक्ष्य मुनिर्दिव्येन चक्षुषा सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥१८॥ चातुर्होत्रं
कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं ॥१९॥ ऋग्यजुःसामाथर्वा-
